अत्थुच्चिय परिवड्ढउ जेण गुणा पायडा हुंति ॥ ७३ ॥

जाती रूपं विद्या त्रीण्यपि निपतन्तु कन्दरे विवरे ।
अर्थ एव परिवर्द्धतां येन गुणाः प्रकटा भवन्ति ॥ ७३ ॥

Let caste, beauty and learning fall ( perish ) into caves and holes : may wealth only increase by which good qualities are made manifest.

सुच्चिय सुहडो सो चेव पंडिओ सो विढत्त-विन्नाणो ।
जो निअ-भुअ-दंडज्जिअ-लच्छीइ उवज्जए कित्तिं ॥ ७४ ॥

स एव सुभटः स एव पण्डितः सोऽर्जितविज्ञानः ।
यो निजभुजदण्डार्जितलक्ष्म्योपार्जयति कीर्त्तिम् ॥ ७४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

He is the best warrior, the scholar and the person who has acquired scientific knowledge, who wins fame by the prosperity earned by his own arms.

न गणंति कुलं न गणंति पावयं पुण्णमवि य न गणंति ।
इस्सरिएण हि मत्ता तहेव परलोयमिहलोयं ॥ ७५ ॥

न गणयन्ति कुलं न गणयन्ति पापं पुण्यमपि च न गणयन्ति ।
ऐश्वर्येण हि मत्तास्तथैव परलोकमिहलोकम् ॥ ७५ ॥

Persons, intoxicated with the pride of wealth or power, do not heed his lineage or sin or religious merit as well as this world or the next.

वंचइ मित्त-कलत्ते नविक्खए माय-पिय-सयणे य ।
मारेइ बंधवेवि हु पुरिसो जो होइ धण-लुद्धो ॥ ७६ ॥

वञ्चयते मित्रकलत्राणि नापेक्षते माता-पितृ-स्वजनांश्च ।
मारयति बान्धवानपि खलु पुरुषो यो भवति धनलुब्धः ॥७६॥

The person who is avaricious deceives ( his ) friend and wife, does not care for ( his ) father, mother and relatives and puts to death even ( his ) kinsmen.

सोल-वरिसो पुरिसो लच्छिं भुंजेइ जो उ जणयस्स ।
एसो नूणं पुत्तो रिण-संबंधेण संपत्तो ॥ ७७ ॥

षोडशवार्षिकः पुरुषो लक्ष्मीं भुङ्क्ते यस्तु जनकस्य ।
एष नूनं पुत्र ऋणसंबन्धेन संप्राप्तः ॥ ७७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

The son, who, attaining majority ( lit : sixteen years of age ) enjoys the fortune of his father, becomes surely a debtor to him.

ताय-विढत्ता * लच्छी नूणं पुत्तस्स होइ सा भइणी।
होइ परस्स परित्थी सयं विढत्ता तओ जुत्ता ॥ ७८ ॥

तातार्जिता लक्ष्मीर्नूनं पुत्रस्य भवति सा भगिनी।
भवति परस्य परस्त्री स्वयमर्जिता ततो युक्ता ॥ ७८ ॥

The fortune earned by a father surely comes as a sister to the son. A person's fortune is like another's wife to a second person. Therefore one's own earnings only are proper to be enjoyed.

पुरिसेण माण-धण-वज्जिएण अच्चंत-जिण्ण-विहवेण।
ते देसा गंतव्वा जत्थ सवासा न दीसंति ॥ ७९ ॥

पुरुषेण मानधनवर्जितेनात्यन्तजीर्णविभवेन।
ते देशा गन्तव्या यत्र सवासा न दृश्यन्ते ॥ ७९ ॥

A man, deprived of all respect and wealth, should go to a country ( to reside there ) where none of his countrymen are to be seen.

* विढत्ता—अर्जित ( H. P. IV, 258. )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वणिआण वणिज्जम्मि माहणाणं मुहम्मि अ ।
खत्तिआणं सिरी खग्गे कारूणं सिप्प-कम्मसु ॥ ८० ॥

वणिजां वाणिज्ये ब्राह्मणानां मुखे च ।
क्षत्रियाणां श्रीः खड्गे कारूणां शिल्पकर्मसु ॥ ८० ॥

The wealth of a trader lies in commerce, that of a *Brahmin* in his mouth ( i. e. he acquires riches or fame by delivering learned discourses ) that of a *Kshatriya* in his trusty sword and that of an artisan in his craft.

किं तीए सिरीए, सुंदरीवि जा होइ अन्न-देसम्मि ।
जाइ न मित्तेहिं समं जा य न दिट्ठा अमित्तेहिं ॥ ८१ ॥

किं तया श्रिया, सुन्दर्यपि या भवत्यन्यदेशे ।
याति न मित्त्रैः समं या च न दृष्टाऽमित्त्रैः ॥ ८१ ॥

Of what worth is that wealth, which though beautiful, is in another country and does not benefit ( lit: does not accompany ) one's friends, nor is seen ( and therefore envied ) by his enemies.

किं तीए सिरीए पीवराए छन्नाए गेह-निहिआए ।
विप्फुरइ जए न जओ मियंक-किरणुज्जला कित्ती ॥ ८२ ॥

किं तया श्रिया पीवर्या छन्नया गेहनिहितया ।
विस्फुरति जगति न यतो मृगाङ्ककिरणोज्ज्वला कीर्त्तिः ॥८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Of what consequence is that wealth, even if immense, lying concealed in a house by which a fame, resplendent as the moon-beams, does not diffuse itself through the world.

---

## अपत्यम् ।

## Child.

आवई-गयंपि सुहए हासेइ य गरुय-सोगमहियंपि ।
मरमाणंपि जियावइ अवच्च-संजीवणी जीवं ॥ ८३ ॥

आपद्गतमपि सुखयति, ह्रासयति च गुरुशोकमधिकमपि ।
म्रियमाणमपि जीवयति, अपत्यसंजीवनी जीवम् ॥ ८३ ॥

A child, like a medicine which restores the dying to life, gladdens a person involved in peril, diminishes even a heavy load of grief and restores life even to a dying man.

धावंत-खलंत-पडंतयाइं धूलीइ धूसरंगाइं ।
धन्नाण रमंति घरंगणम्मि दो-तिन्नि डिंभाइं ॥ ८४ ॥

धावत्स्खलत्पतन्तो धूल्या धूसरिताङ्गाः ।
धन्यानां रमन्ते गृहाङ्गणे द्वित्रा डिम्भाः ॥ ८४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Those are blessed, in the yard of whose houses two or three children play, run, miss their steps, fall down and become covered with dirt ( have their body grey with dust ).

को नाम गुण-*मरट्टो सोहग्ग-*मडप्फरो य को तेसिं ।
का वा सुहासिया वा पियाण जेसिं सुओ नत्थि ? ॥ ८५ ॥

को नाम गुणगर्वः सौभाग्यगर्वश्च कस्तासाम् ।
का वा सुखासिका वा प्रियाणां यासां सुतो नास्ति ? ॥८५॥

Of what worth is the pride of accomplishments or the pride of good fortune or the happy position of those lovely women who have no son ?

* See H. D. VI, 120.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# स्त्री ।

## Woman.

देवाण दाणवाण य मंतं मंतंति मंत-निउणा जे ।
इत्थी-चरिअम्मि उणो ताणवि मंता कहिं नट्ठा ॥ ८६ ॥

देवानां दानवानां च मन्त्रं मन्त्रयन्ति मन्त्रनिपुणा ये ।
स्त्रीचरिते पुनस्तेषामपि मन्त्राः कुत्र नष्टाः ॥ ८६ ॥

Even the counsels of those who are expert in deliberation and who counsel gods and demons are of no avail in unravelling the character of women.

सायर-जल-परिमाणं सुर-गिरि-माणं तिलोअ-संठाणं* ।
जाणंति बुद्धिमंता महिला-चरियं न याणंति ॥ ८७ ॥

सागरजलपरिमाणं सुरगिरिमानं त्रिलोकीसंस्थानम् ।
जानन्ति बुद्धिमन्तो महिलाचरितं न जानन्ति ॥ ८७ ॥

The wise know the depth of the ocean, the height of the Meru hill ( lit, the hill of gods ) the configuration of the three worlds, but are ignorant of the nature of women.

---

* Another reading " रविचरियं गहचरियं ताराचरियं च राहुचरियं च " i. e. the motions of the sun, the planets, the stars the planet Rahu.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वंचिज्जइ निअ-सामी दिज्जइ जीयंपि, किज्जए जिस्सा।
कज्जे गरुअमकज्जं हा हित्थी सावि विहडेइ ॥ ८८ ॥

वञ्च्यते निजस्वामी दीयते जीवितमपि, क्रियते यस्याः।
कार्ये गुर्वकार्यं हा हा स्त्री सापि विघटते ॥ ८८ ॥

For the sake of a woman, one deceives his own master, gives even his life and does sinful things. Alas ! With all these a woman, ( not being satisfied ) breaks with her protector.

मारइ पिय-भत्तारं हणइ सुअं तह विणासए अत्थं।
निय-गेहंपि पलीवइ नारी रागाउरा पावा ॥ ८९ ॥

मारयति प्रियभर्तारं हन्ति सुतं तथा विनाशयत्यर्थम्।
निजगेहमपि प्रदीपयति नारी रागातुरा पापा ॥ ८९ ॥

A sinful woman inflamed with passion, kills her own dear husband, her own son, destroys wealth and burns her own house.

दिवा कागाण बीहेसि रत्तिं तरसि नम्मयं।
कुतित्थाणि य जाणासि अच्छीणं ढंकणाणि य ॥ ९० ॥

दिवा काकेभ्यो बिभेषि रात्रौ तरसि नर्मदाम्।
कुतीर्थानि च जानास्यक्ष्णामाच्छादनानि च* ॥ ९० ॥

* c. f. दिवा बिभेति काकेभ्यो रात्रौ तरति नर्मदाम्।
कुतीर्थानि च जानाति जलजं त्वचिरोधनम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

You fear a crow in daylight, but cross the river *Nerbuda* at night ( to meet your lover ); you both know how to veil other's eyes and to have reconrse to wicked means.

जं चित्ते चिंतेउं जं न सुविणेवि पिच्छिउं सक्कं।
लीलावईण लीला-वावारो तम्मि कज्जम्मि ॥ ६१ ॥

यच्चित्ते चिन्तयितुं यन्न स्वप्नेऽपि द्रष्टुं शक्यम्।
लीलावत्या लीलाव्यापारस्तस्मिन् कार्ये ॥ ६१ ॥

What is incapable of being thought of in the mind or of being seen even in dreams, can easily be accomplished by wanton women in their amorous sport.

तावच्चिय नेह-तरू सिणिद्ध-बंधूण वड्ढए निच्चं।
नारी-वयण-दिढ-निसिय-परसु-धाराओ न हवंति ॥ ६२ ॥

तावदेव स्नेहतरुः स्निग्धबन्धूनां वर्धते नित्यम्।
नारीवदनदृढनिशितपरशुधारा न भवन्ति ॥ ६२ ॥

The tender ( lit : young ) tree of affection of friends ever grows, only so long as it does not feel the keen edge of the axe of woman's words.

जम्मंतीए सोगो वड्ढंतीए य वड्ढए चिंता।
परिणीआए दंडो जुवइ-पिआ दुक्खिओ निच्चं ॥ ६३ ॥

जायमानायां शोको वर्धमानायां च वर्धते चिन्ता।
परिणीतायां दण्डो युवतिपिता दुःखितो नित्यम् ॥ ६३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

The father of a young girl, is ever miserable, feeling grief the moment she is born, his anxiety increasing as she grows, paying fine ( dowry &c ) when she is married.

निय-घर-सोसा पर-गेह-मंडणी कुल-कलंक-कली-भवणं ।
जेहिं न जाया धूआ ते सुहिया जीव-लोगम्मि ॥ ६४ ॥

निजगृहशोषा परगेहमण्डनी कुलकलङ्ककलिभवनम् ।
येषां न जाता दुहिता ते सुखिता जीवलोके ॥ ६४ ॥

In this world of life, they are happy who have no daughter born to them, a daughter who destroys ( lit : dries up ) her own home and adorns another's, who brings disgrace ( shame ) to her father's lineage ( family ) and who is the abode of discord ( receptacle of the shame of her family and of quarrels. )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनित्यता ।

## Transitoriness.

सव्वस्स अणिच्चत्तं जुव्वण-धन-सयण-अत्थ-दाराणं ।
देहस्स जीवियस्स य इक्कंपि न पिच्छए निच्चं ॥ ६५ ॥

सर्वस्यानित्यत्वं यौवनधनस्वजनार्थदाराणाम् ।
देहस्य जीवितस्य चैकमपि न दृश्यते नित्यम् ॥ ६५ ॥

Everything is transitory ; one's youth, riches relatives, property and wife as well as one's body and life : not even one ( of these ) is found ever-lasting.

जुव्वणं रूव-संपत्ती सोहग्गं धण-संपया ।
जीवियं वावि जीवाणं जल-बुब्बुअ-संनिहं ॥ ६६ ॥

यौवनं रूपसंपत्तिः सौभाग्यं धनसंपत् ।
जीवितं चापि जीवानां जलबुद्बुदसंनिभम् ॥ ६६ ॥

Youth, excellence of beauty, good-luck, abundance of wealth and even lives of beings are short-lived like bubbles of water.

दाण-माणोवयारेहिं साम-भेआइएहि य ।
न सक्का सा निवारेउं तेलुक्केण अणिच्चया ॥ ६७ ॥

दानमानोपचारैः सामभेदादिकैश्च ।
न शक्या सा निवारयितुं त्रैलोक्येनानित्यता ॥ ६७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

There is nothing which is not capable of being warded off by even the three worlds (Heaven, Earth and Hell ), by the offering of presents and adoration or by policies of conciliation and division, and that is transitoriness.

सव्वत्थ निरणुक्कोसा निव्विसेसं पहारिणी ।
सुत्त-मत्त-पमत्ताणं एगा जग्गि अणिच्चया ॥ ६८ ॥

सर्वत्र निरनुक्रोशा निर्विशेषं प्रहारिणी ।
सुप्तमत्तप्रमत्तानामेका जगत्यनित्यता ॥ ६८ ॥

In this world there is only onething which is everywhere cruel, which strikes without any distinction and spares not even one while asleep or intoxicated or insane, and this is transitoriness.

जल-लव-तरलं जीयं अथिरा लच्छी विभंगुरो देहो ।
तुच्छा य काम-भोगा निबंधणं दुक्ख-लक्खाणं ॥ ६६ ॥

जललवतरलं जीवितमस्थिरा लक्ष्मीर्विभङ्गुरो देहः ।
तुच्छाश्च कामभोगा निबन्धनं दुःखलक्षाणाम् ॥ ६६ ॥

Life is unstable like a drop of water, wealth is unsteady and the human body is fragile, ( *a* ) the gratification of sensual passion is unsubstantial and is the cause of innumerable miseries ( lit : lacs of miseries )

(*a*) c. f. "This tenement of clay" &c. "Dust thou art to dust" &c.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदओ भुवणक्कमणं अत्थमणं चेय एग-दिवसम्मि।
सूरस्सवि तिन्नि दसा का गणणा इयर-लोगस्स ? ॥ १०० ॥

उदयो भुवनाक्रमणमस्तमनं चेत्येकदिवसे।
सूरस्यापि तिस्रो दशाः का गणनेतरलोकस्य ? ॥ १०० ॥

Where even the sun passes through the three stages in one day viz : rise, progress and setting, the common run of men must be left out of reckoning (i. e. the common people must inevitably undergo these stages )

चंदस्स खओ न हु तारयाण रिद्धीवि तस्स न हु ताण।
गुरुआण चडण-पडणं का कहा निच्च-पडियाणं ? ॥ १०१ ॥

चन्द्रस्य क्षयो न तु तारकाणामृद्धिरपि तस्य न तु तासाम्।
गुरूणां चटनपतनं का कथा नित्यपतितानाम् ? ॥ १०१ ॥

It is the moon who wanes and wanes and not the stars, it is the great only who rise up and fall down ; of what consequence are the ever-fallen ?) ( lit : what reckoning can be made of the ever-fallen ? )

अंबय-फलं सुपक्कं सिढिलं विंटं समुब्भडो पवणो।
साहा मेल्लण-सीला न याणिमो कज्ज-परिणामो ॥ १०२ ॥

आम्रफलं सुपक्वं शिथिलं वृन्तं समुद्भटः पवनः।
शाखा मोचनशीला न जानीमः कार्यपरिणामम् ॥ १०२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

A ripe mango, a loosened stalk, a high wind, a branch of a tree liable to be broken, of these we know the end ; but we do not know the end of our deeds.

लच्छी सहाव-चवला तओवि चवलं च जीवियं होइ ।
देहो तओवि चवलो उवयार-विलंबना कीस ? ॥ १०३ ॥

लक्ष्मीः स्वभावचपला ततोऽपि चपलं च जीवितं भवति ।
देहस्ततोऽपि चपल उपचारविडम्बना कस्मात् ? ॥ १०३ ॥

Fortune is fickle by its very nature ; existence in the world is more unsteady and body is still more inconstant, why then should we trouble for adornment ( of the body ) ?





Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मृत्युः ।

## Death.

अज्झवसाण निमित्ते आहार वेअणाय पराघाए ।
फासे आणापाणू सत्तविहं झिज्जए आउं ॥ १०४ ॥

अध्यवसानेन निमित्तेन आहारेण वेदनया पराघातेन ।
स्पर्शनापानप्राणेन सप्तविधं क्षीयत आयुः ॥ १०४ ॥

The duration of life is cut off in seven ways viz : by personal exertion, ( e. g. suicide ), accidents, poisonous food, mortal pain, fatal blow by some weapon, by touch ( e. g. of a poisonous snake ) and lastly by a natural death.

सूल-विस-अहिविस-मुइअ-पाणीय-सत्थग्गि-संभमेहिं च ।
देहंतर-संकमणं करेइ जीवो मुहुत्तेणं ॥ १०५ ॥

शूलविषाहिविषमुदितपानीयशास्त्राग्निसंभ्रमैश्च ।
देहान्तरसंक्रमणं करोति जीवो मुहूर्तेन ॥ १०५ ॥

Living beings transmigrate in a moment succumbing to the effect of the poison of cholic ( i. e. cholic pain ) or the poison of a snake or the prick of a poisonous needle or poisonous drinks or deadly arms or fire or fear.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं कल्लं कायव्वं नरेण अज्जेव तं वरं काउं।
मच्चू अकरुण-हियओ न हु दीसइ आवडंतोवि ॥ १०६ ॥

यत्कल्ये कर्तव्यं नरेणाद्यैव तद्वरं कर्तुम्।
मृत्युरकरुणहृदयो न खलु दृश्यत आपतन्नपि ॥ १०६ ॥

It is preferable that a man should do to-day that which he ought to do to-morrow; for the hard-hearted death is not seen even when approaching (lit: on the point of falling).

देविंदा समहिड्ढीया दाणविंदा य विस्सुया।
नरिंदा जे अ विक्कंता मरणं विवसा गया ॥ १०७ ॥

देवेन्द्राः समहर्धिका दानवेन्द्राश्च विश्रुताः।
नरेन्द्रा ये च विक्रान्ता मरणं विवशा गताः ॥ १०७ ॥

The Kings of gods, possessing immense riches, the celebrated *danavas*, the mighty lords of men—all *are subject* to the sway of death.

माय-पिय-पुत्त-बंधू सयल-कुसलाइआइं कारंति।
न मरंतस्सुवयारं तिल-तुसमित्तंपि हु जणंति ॥ १०८ ॥

मातापितृपुत्रबन्धवः सकलकुशलादिकानि कारयन्ति।
न म्रियमाणस्योपकारं तिलतुषमात्रमपि खलु जनयन्ति ॥१०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

One's mother, father, sons, kinsmen can secure for him all kinds of good but can never do the least good to a dying person ( lit : to the extent of a *til* or husk ).

धीरेणवि मरियव्वं कायरिएणावि अवस्समरियव्वं।
दुण्हंपि हु मरियव्वे वरं धीरत्तेण मरियव्वं ॥ १०६ ॥

धीरेणापि मर्तव्यं कातरेणाप्यवश्यमर्तव्यम्।
द्वयोरपि खलु मर्तव्ये वरं धीरत्वेन मर्तव्यम् ॥ १०६ ॥

The courageous as well as the timid must surely die as both are mortal,—it is better to die as a courageous man.

अज्ज' परं परारिं पुरिसा चिंतंति अत्थ-संपत्तिं।
अंजलि-गयंव तोअं गलंतमाउं न पेच्छंति ॥ ११० ॥

अद्य परुत् परारि पुरुषाश्चिन्तयन्त्यर्थसंपत्तिम्।
अञ्जलिगतमिव तोयं गलदायुर्न पश्यन्ति ॥ ११० ॥

A person thinks of his wealth and property to day, to-morrow and day after ; but does not see years ( lit : duration of life ) trickling down like water contained in the palms of the hand.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ही ! संसार-सहावाचरियं नेहाणुराय-रत्तावि ।
जे पुव्वण्हे दिट्ठा ते अवरण्हे न दीसंति ॥ १११ ॥

ही ! संसारस्वभावाचरितं स्नेहानुरागरक्ता अपि ।
ये पूर्वाह्णे दृष्टास्तेऽपराह्णे न दृश्यन्ते ॥ १११ ॥

Alas ! Such is the nature of the ways of this world: those whom we have seen in the forenoon with affection and attachment to us, are not seen in the afternoon and the world is so transitory that our dear person whom we have met in the forenoon, may perish before afternoon.

सा नत्थि कला, तं नत्थि ओसहं, नत्थि किंपि विन्नाणं ।
जेण धरिज्जइ काया खज्जंती काल-सप्पेणं ॥ ११२ ॥

सा नास्ति कला, तन्नास्त्यौषधं, नास्ति किमपि विज्ञानम् ।
येन ध्रियते काया खाद्यमाना कालसर्पेण ॥११२॥

There is no art, no medicine, no science by which a body may be saved ( lit : caught hold of ) from the jaws of the death-serpent.

दीहर-फणिंद-नाले महीयर-केसर-दिसा-मह-दलिल्ले ।
ओ ! पियइ काल-भमरो जण-मयरंदं पुहवि-पउमे ॥ ११३ ॥

दीर्घफणीन्द्रनाले महीधरकेसरदिग्महादले ।
आः ! पिबति कालभ्रमरो जनमकरन्दं पृथिवीपद्मे ॥ ११३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Alas! Death, like a bee, drinks the honey of the people of the world which is like a lotus whose stalk is the infernal serpent, going deep ( lit: long ) and whose filaments are the mountains and whose petals are the ten quarters.

छाया-मिसेण कालो सयल-जियाणं छलं गवेसंतो ।
पासं कहवि न मुंचइ, ता धम्मे उज्जमं कुणह ॥ ११४ ॥

छायामिषेण कालः सकल-जीवानां छलं गवेषयन् ।
पार्श्वं कथमपि न मुञ्चति तस्माद् धर्म उद्यमं कुरुत ॥११४॥

Death, under pretence of a shadow, looking into the tricks of all living beings, never forsakes their sides; therefore you should exert yourselves to religion.

न सा जाई न सा जोणी न तं ठाणं न तं कुलं ।
न जाया न मुआ जत्थ सव्वे जीवा अणंतसो ॥ ११५ ॥

न सा जातिर्न सा योनिर्न तत् स्थानं न तत् कुलम् ।
न जाता न मृता यत्र सर्वे जीवा अनन्तशः ॥ ११५ ॥

There is no caste, no womb, no place, no family where all living beings have not been born or died eternal times.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालस्स माय-मरणं भज्जा-मरणं च जुव्वणारंभे ।
वुड्ढस्स पुत्त-मरणं तिन्निवि गरुआइं दुक्खाइं ॥ ११६ ..

बालस्य मातृमरणं भार्यामरणं च यौवनारम्भे ।
वृद्धस्य पुत्रमरणं त्रीण्यपि गुरूणि दुःखानि ॥ ११६ ॥

The loss of one's mother in childhood, of one's wife at the beginning of youth and of one's son in old age these are severe griefs.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# इन्द्रियम् ।

## Senses.

इंदिय-चवल-तुरंगा दुग्गइ-मग्गाणुधाविरा निच्चं ।
उम्मग्गे णिवडंता निरुंभइ नाण-रस्सीहिं ॥ ११७ ॥

इन्द्रियचपलतुरङ्गा दुर्गतिमार्गानुधावितारो नित्यम् ।
उन्मार्गे निपतन्तो निरुध्यन्ते ज्ञानरश्मिभिः ॥ ११७ ॥

The senses like restive steeds are always careering along the path of ruin and are checked by the reins of knowledge when straying into evil ways.

जह अग्गीइ लवोवि हु पसरंतो दहइ गाम-नयराइं ।
इक्किक्कमिंदियंपि हु तह पसरंतं समग्ग-गुणे ॥ ११८ ॥

यथाऽग्नेर्लवोऽपि खलु प्रसरन् दहति ग्रामनगराणि ।
एकैकमिन्द्रियमपि खलु तथा प्रसरत् समग्रगुणान् ॥ ११८ ॥

A single organ of sense, if unchecked, like a spark of fire burning villages and cities when spread, can ( like wise ) burn all good qualities i. e. just as a spark of fire reduces to ashes whole villages and towns so too a single organ of sense when enjoyed to excess has the power to destroy all virtues.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नयणे कहिज्ज पेम्मं नयणे दोसंपि परिफुडं कहइ ।
नयणे कहिज्ज कामं नयणे वेरग्गमुवदिसइ ॥ ११६ ॥

नयने कथयतः प्रेम नयने दोषमपि परिस्फुटं कथयतः ।
नयने कथयतः कामं नयने वैराग्यमुपदिशतः ॥ ११६ ॥

Love is eloquently spoken by the eyes, ( 1 ) one's guilt is also revealed by the eyes, passion is expressed in the eyes and indifference to the world is likewise advertized by the eyes.

सल्लं कामा विसं कामा कामा आसी-विसोवमा ।
कामा पत्थेअमाणा अ अकामा जंति दुग्गइं ॥ १२० ॥

शल्यं कामा विषं कामाः कामा आशीविषोपमाः ।
कामान् प्रार्थयमानाश्चाकामा यान्ति दुर्गतिम् ॥ १२० ॥

Sensual desires are painful thorns, they are poison and are like deadly poisonous snakes—those hankering after desires unwillingly go to hell.

वावाराणं गुरुओ मण-वावारो जिणेहिं पण्णत्तो ।
जो नेइ सत्तमिं वा अहवा मुक्खं पराणेइ ॥ १२१ ॥

व्यापाराणां गुरुर्मनोव्यापारो जिनैः प्रज्ञप्तः ।
यो नयति सप्तमीं वाऽथवा मोक्षं पराणयति ॥ १२१ ॥

( 1 ) cf. "tell-tale glance."

Of the operations, the mental operations are said by the *Jinas* to be the most consequential—operations which lead a person to the seventh ( hence the greatest ) hell or to salvation ( the highest bliss. )

सव्वो पुव्व-कयाणं कम्माणं पावए फल-विवागं।
अवराहेसु गुणेसु अ निमित्तमित्तं परो होइ ॥ १२२ ॥
सर्वः पूर्वकृतानां कर्मणां प्राप्नोति फलविपाकम्।
अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥ १२२ ॥

Men bear the consequences of all deeds done previously : in good or evil others are mere agents.

कत्थावि जीवो बलिओ कत्थवि कम्माइं हुंति बलियाइं।
जीवस्स य कम्मस्स य पुव्वनिबद्धाइं वेराइं ॥ १२३ ॥
क्वापि जीवो बलिकः क्वापि कर्माणि भवन्ति बलिकानि।
जीवस्य च कर्मणश्च पूर्वनिबद्धानि वैराणि ॥ १२३ ॥

In some cases a living being rises superior to the influence of karma, sometimes the *Karma* * becomes stronger : the living beings and the *Karma* wage a perpetual warfare with each other ( lit : the enmity of a soul and its deeds continues through a perpetual series of births. )

* Lit : action : from a Jain point of view—the certain consequence of acts done in a former life or lives.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयमेव कुणसि कम्मं तेण य बाहिज्जसि तुमं चेव।
रे जीव! अप्प-वैरिय! अन्नस्स य देसि किं दोसे? ॥ १२४ ॥

स्वयमेव करोषि कर्म तेन च बाध्यसे त्वमेव।
रे जीव! आत्मवैरिन्! अन्यस्य च ददासि किं दोषम्? ॥१२४॥

O thou soul! Thou dost do deeds which turn out to be fetters to bind thyself, thou thus provest the enemy of thy own; why then shouldst thou lay the fault at another's door?

ठाणं उच्चययरं मज्झं हीणं च हीणतरगं च।
जेणं जहिं गंतव्वं चिट्ठावि य तारिसी होइ ॥ १२५ ॥

स्थानमुच्चतरं मध्यं हीनं च हीनतरं च।
येन यत्र गन्तव्यं चेष्टापि च तादृशी भवति ॥ १२५ ॥

Postions are of four kinds, namely (1) the high (2) the middle (3) the low and (4) the lowest: and (human) exertion is (to be applied) in accordance with the position to be attained.

नच्चंता कीडंता कम्मं कुव्वंति निग्घिणा जीवा।
पच्छा तस्स विवागे रुअंति कलुणं महा-दुक्खा ॥ १२६ ॥

नृत्यन्तः क्रीडन्तः कर्म कुर्वन्ति निर्घृणा जीवाः।
पश्चात् तस्य विपाके रुदन्ति करुणं महादुःखाः ॥ १२६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Beings, being cruel do deeds while dancing, playing (i. e. easily); but piteously cry in great misery when they have to suffer the effect of those past deeds afterwards.

धारिज्जइ जलनिहीवि कल्लोलोत्थंभि-सत्त-कुल-सेलो ।
न हु अन्न-जम्म-निम्मिअ-सुहासुहो कम्म-परिणामो ॥ १२७ ॥

धार्यते जलनिधिरपि कल्लोलोत्तम्भिसप्तकुलशैलः ।
न त्वन्यजन्मनिर्मितशुभाशुभः कर्मपरिणामः ॥ १२७ ॥

A man may hold back the ocean surrounded by seven *kula* (mountains) on which the waves incessently break; but none cau avoid (lit: hold back) the consequences of good or evil deeds performed in another birth.

धम्मेण कुल-प्पसूई धम्मेण दिव्व-रूव-संपत्ती ।
धम्मेण धण-समिद्धी धम्मेण सुवित्थडा कित्ती ॥ १२८ ॥

धर्मेण कुलप्रसूतिर्धर्मेण दिव्यरूपसंपत्तिः ।
धर्मेण धनसमृद्धिर्धर्मेण सुविस्तृता कीर्त्तिः ॥ १२८ ॥

Religion (religious merit acquired in a previous birth) is the cause of birth in a good family, excellent beauty (lit: excellence of heavenly beauty), immense wealth and widespread fame.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बावत्तरी-कला-पंडियावि पुरिसा अपंडिया चेव ।
सव्व-कलाणं पवरं जे धम्म-कलं न जाणंति ॥ १२६ ॥

द्वासप्ततिकलापण्डिता अपि पुरुषा अपण्डिता एव ।
सर्वकलानां प्रवरां ये धर्मकलां न जानन्ति ॥ १२६ ॥

A person, versed in the seventy-two elegant arts, is but a dunce if he does not know the greatest of all arts, viz, the art of religion.

किं जंपिएण बहुणा जं जं दीसइ समत्थ-जिय-लोए ।
इंदिय-मणाभिरामं तं तं धम्मं-फलं सव्वं ॥ १३० ॥

किं जल्पितेन बहुना यद् दृश्यते समस्तजीवलोके ।
इन्द्रियमनोऽभिरामं तत् तद् धर्मफलं सर्वम् ॥ १३० ॥

It is needless to dwell at any length,—whatever pleasing to the senses, are found in this world of life, are all the fruits of religious merit.

तस्स न हवइ दुक्खं कयावि जस्सत्थि निम्मलं पुण्णं ।
अण्ण-घरत्थं दव्वं भुंजइ अण्णो जणो जेण ॥ १३१ ॥

तस्य न भवति दुःखं कदापि यस्यास्ति निर्मलं पुण्यम् ।
अन्यगृहस्थं द्रव्यं भुङ्क्तेऽन्यो जनो येन ॥ १३१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

One who has a store of pure religious merit, has never to undergo misery, but by virtue of his merit enjoys the good things of this life, belonging to another as if they belonged to him.

मंद-गमणं मूयत्तं सोहणं कोह-मोह-निग्गहणं ।
इंदिय-दप्प-च्छेओ धम्मिय-जण-मंडणं एयं ॥ १३२ ॥

मन्दगमनं मूकत्वं शोभनं क्रोधमोहनिग्रहणम् ।
इन्द्रियदर्पच्छेदो धार्मिकजनमण्डनमेतत् ॥ १३२ ॥

A slow gait, an admirable silence, the crushing of anger and worldly and sensual affection, the destruction of the pride of senses—these are the ornaments of the virtuous.

संसारम्मि असारे नत्थि सुहं वाहि-वेयणा-पउरे ।
जाणंतो इह जीवो न कुणइ जिण-देसियं धम्मं ॥ १३३ ॥

संसारेऽसारे नास्ति सुखं व्याधिवेदनाप्रचुरे ।
जानन्निह जीवो न करोति जिनदेशितं धर्मम् ॥ १३३ ॥

Living beings ( people ) do not follow ( lit : do ) the religion shown by the *jinas,* even knowing that there is no happiness in this frail world which is full of disease and pain.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भव-सय-सहस्स-दुलहे जाइ-जरा-मरण-सागरोत्तारे।
जिण-वयणम्मि गुणायर! खणमवि मा काहिसि पमायं ॥१३४॥

भवशतसहस्रदुर्लभे जातिजरामरणसागरोत्तारे।
जिनवचने गुणाकर! क्षणमपि मा कार्षीः प्रमादम् ॥ १३४ ॥

Oh, thou mine of good qualities, do not for a moment be heedless of the words of Jina (who has conquered the eight Karmas or deeds) which one rarely gets the opportunity of hearing even in a hundred thousand births and which helps one to cross the ocean of births, decrepitudes and deaths.

सो धम्मे पडिबुद्धो विग्घोवहओवि जो समुज्जमइ।
तयभावे सव्वोवि हु धम्महिगारी भवे इहरा ॥ १३५ ॥

स धर्मे प्रतिबुद्धो विघ्नोपहतोऽपि यः समुद्यच्छति।
तदभावे सर्वोऽपि हि धर्माधिकारी भवेदितरथा ॥ १३५ ॥

He is truly versed in religion, who follows it even when smitten by misery and pain, otherwise every one is religious in any other case.

जा जा वच्चइ रयणी न सा पडिनिअत्तइ।
अहम्मं कुणमाणस्स अहला जंति राइओ ॥
धम्मं च कुणमाणस्स सहला जंति राइओ ॥ १३६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

या या व्रजति रजनिर्न सा प्रतिनिवर्तते ।
अधर्मं कुर्वाणस्याफला यान्ति रात्रयः ॥
धर्मं च कुर्वाणस्य सफला यान्ति रात्रयः ॥ १३६ ॥

The nights that are gone, never come back, the nights that are spent in doing evil deeds are wasted but the nights passed in doing meritorious deeds, are usefully spent.

अणवट्ठियस्स धम्मं मा हु कहिज्जा सुट्ठु वि पियस्स ।
विच्छायं होइ मुहं विज्झायग्गिं धमंतस्स ॥ १३७ ॥

अनवस्थितस्य धर्मं मा खलु कथयेत् सुष्ठ्वपि प्रियस्य ।
विच्छायं भवति मुखं विध्याताग्निं धमतः ॥ १३७ ॥

Do not tell anything of religion to a person whose mind is wavering although he is very dear to you. The face of a person blowing a fire into flames loses its beauty.

किं ताए पढियाए पय-कोडीए पराल-भूयाए ।
जं इत्तियं न नायं परस्स पीडा न कायव्वा ? ॥ १३८ ॥

किं तया पठितया पदकोट्या परालभूतया ।
यदेतावन्न ज्ञातं परस्य पीडा न कर्तव्या ? ॥ १३८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Of what worth is the reading of millions of burden of *Padas* if this much is not learnt that one should not inflict pain on others ?

सव्वे जीवावि इच्छंति जीविउं न मरिज्जिउं ।
तम्हा पाणिवहं घोरं निग्गंथा वज्जयंति णं ॥ १३९ ॥

सर्वे जीवा अपीच्छन्ति जीवितुं न मर्तुम् ।
तस्मात् प्राणिवधं घोरं निर्ग्रन्था वर्जयन्ति ॥ १३९ ॥

All living beings long to live and not to die ; hence ascetics avoid the sinful taking away of life i. e. abstain from killing living beings.

जो जीव-वहं काउं करेइ खणमित्तमप्पणो तित्तिं ।
छेअण-भेअण-पमुहं नरय-दुहं सो चिरं लहइ ॥ १४० ॥

यो जीववधं कृत्वा करोति क्षणमात्रमात्मनस्तृप्तिम् ।
छेदन-भेदन-प्रमुखं नरकदुःखं स चिरं लभते ॥ १४० ॥

One who enjoys self-satisfaction even for a moment by killing a living being, is subjected eternally to the miseries of hell beginning with mutilation, rendering asunder etc.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ जीवियस्स इक्कस्स कारणे हणइ जीव-कोडीओ ।
ता किं सासय-भावं तमित्थ पडिवज्जए कहवि ? ॥ १४१ ॥

यदि जीवितस्यैकस्य कारणे हन्ति जीवकोटीः ।
ततः किं शाश्वतभावं तदत्र प्रतिपद्यते कथमपि ? ॥ १४१ ॥

Even if ten millions of living beings are killed for the life of a single person, the life of the latter can in no way attain the state of eternity.

दिज्जा हि जो मरंतस्स सागरंतं वसुंधरं ।
जीवियं वावि जो दिज्जा जीवियं तु स इच्छइ ॥ १४२ ॥

दद्याद्धि यो म्रियमाणाय सागरान्तां वसुन्धराम् ।
जीवितं वापि यो दद्याज्जीवितं तु स इच्छति ॥ १४२ ॥

If the whole world bounded by ocean or life be offered to a dying person, he would prefer life.

* टुंटत्तं मूकत्तं बहिरत्तं चेव चक्खु-हीनत्तं ।
दुहियत्तं दुब्भगत्तं जीव-हिंसा-फलं नेयं ॥ १४३ ॥

छिन्नकरत्वं मूकत्वं बधिरत्वं चापि चक्षुर्हीनत्वम् ।
दुःखितत्वं दुर्भगत्वं जीवहिंसाफलं ज्ञेयम् ॥ १४३ ॥

* See H. D. IV 3.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

These are known to be the fruits of the killing of living beings viz : a broken arm, dumbness, deafness, blindness, grief and misfortunes.

दट्ठूण पाणि-निवहं भीमे भव-सायरम्मि दुक्खत्तं ।
अविसेसा अणुकंपं दुहावि सामत्थओ कुणइ ॥ १४४ ॥

दृष्ट्वा प्राणिनिवहं भीमे भवसागरे दुःखार्तम् ।
अविशेषादनुकम्पां द्विधापि सामर्थ्यतः कुर्यात् ॥ १४४ ॥

Seeing living beings suffer misery in the terrible sea of life, a person should according to his ability, extend his pity, without any distinction, in both ways viz : by deed and will.

खण-मित्त-सुक्ख-कज्जे जीवे निहणंति जे महा-पावा ।
हरिचंदन-वण-संडं दहंति ते छार-कज्जम्मि ॥ १४५ ॥

क्षणमात्रसौख्यकार्ये जीवान् निघ्नन्ति ये महापापाः ।
हरिचन्दनवनषण्डं दहन्ति ते क्षारकार्ये ॥ १४५ ॥

Those vile sinful persons who for the sake of a momentary pleasure, kill animals are like those who burn a part of Harichandana forest ( a yellow and fragrant sort of sandal wood ) for the sake of obtaining its soda.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीव-दयाए रहिओ जीवो अन्नं करेइ जो धम्मं।
आरुहइ छिन्न-कन्नं सो खरमेरावणं मुत्तुं ॥ १४६ ॥

जीवदयया रहितो जीवोऽन्यं करोति यो धर्मम्।
आरोहति च्छिन्नकर्णं स खरमैरावणं मुक्त्वा ॥ १४६ ॥

He, who devoid of compassion for animals, practises another virtue, is like one who rejects *Airâvata* (Indra's elephant) and mounts an earless ass (lit: having its ears torn).

हंतूण पर-प्पाणे अप्पाणं जो करइ स-प्पाणं।
अप्पाणं दिवसाणं कएण णासेइ अप्पाणं ॥१४७॥

हत्वा पर-प्राणानात्मानं यः करोति सप्राणम्।
अल्पानां दिवसानां कृते नाशयत्यात्मानम् ॥ १४७ ॥

He, who adds to his vitality (lit: makes himself full of life) by killing others (lit: destroying the life of others) destroys his soul (lit: himself) for the sake of (living) a few days more.

मुक्खत्थीहिं करेअव्वो धम्मो जीव-दयामओ।
जाइ जीवो अहिंसंतो जओ अमरणं पयं ॥ १४८ ॥

मोक्षार्थिभिः कर्तव्यो धर्मो जीवदयामयः।
याति जीवोऽहिंसन् यतोऽमरणं पदम् ॥ १४८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Those who desire salvation should follow a religion which is permeated with ( the spirit of ) compassion for living beings, for a living being attains immortality only by abstaining from the killing of all animate nature.

भव-जलही-तरी-तुल्लं महल्ल-कल्लाण-दुम-अमय-कुल्लं ।
संजणिय-सग्ग-सिव-सुक्ख-समुदयं कुणह जीव-दयं ॥१४६॥

भवजलधितरीतुल्यां महाकल्याणद्रुमामृतकुल्याम् ।
संजनितस्वर्गशिवसौख्यसमुदयां कुरुत जीवदयाम् ॥ १४६ ॥

Be compassionate to living beings—compassion which confers all the happiness, welfare and heaven, which is like a vessel in the ocean of life and which is like an undying channel for conveying the ambrosial fluid.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सत्यम् ।

## Truth.

अलियं न भासियव्वं अत्थि हु सच्चंपि जं न वत्तव्वं ।
सच्चंपि तं न सच्चं जं पर-पीडाकरं वयणं ॥ १५० ॥

अलीकं न भाषितव्यमस्ति खलु सत्यमपि यन्न वक्तव्यम् ।
सत्यमपि तन्न सत्यं यत्परपीडाकरं वचनम् ॥ १५० ॥

One should not speak untruth. There is also a kind of truth which should not be spoken. Truth which gives pain to others is no truth.

लाउअ-बीअं इक्कं नासइ भारं गुडस्स जह सहसा ।
तह गुण-गणं असेसं असच्च-वयणं विणासेइ ॥ १५१ ॥

अलाबुबीजमेकं नाशयति भारं गुडस्य यथा सहसा ।
तथा गुणगणमशेषमसत्यवचनं विनाशयति ॥ १५१ ॥

Just as a single seed of bitter pumpkin spoils a jarful of treacle, so too a false speech destroys all good qualities.

मोहंधयार-पडिया पाविउकामा दुरंत-दुक्खाइं ।
नट्ठा नासंति परं तुच्छा मिच्छोवएसेहिं ॥ १५२ ॥

मोहान्धकारपतिताः प्राप्तुकामा दुरन्तदुःखानि ।
नष्टा नाशयन्ति परं तुच्छा मिथ्योपदेशैः ॥ १५२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Those (vile) insignificant persons who, desirous of getting immeasurable misery, become afflicted with the darkness of mundane enjoyments and are themselves lost, make others lost by their false advices.

इह-लोएच्चिय जीवा जीहा-छेअं वहं व बंधं वा।
अयसं धण-नासं वा पावंति अ अलिय-वयणाओ ॥ १५३ ॥

इहलोक एव जीवा जिह्वाच्छेदं वधं वा बन्धं वा।
अयशो धननाशं वा प्राप्नुवन्ति चालीकवचनात् ॥ १५३ ॥

By falsehood, people, even in this world, suffer loss of tongue, ( referring to the ancient Hindu punishment of cutting the tongue of one who spoke a lie ) death, imprisonment, infamy, and loss of wealth.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ब्रह्मचर्यम् ।

## Chastity.

मेरू गरिट्ठो जह पव्वयाणं एरावणो सार-बलो गयाणं ।
सिंहो बलिट्ठो जह सावयाणं तहेव सीलं पवरं वयाणं ॥१५४॥

मेरुर्गरिष्ठो यथा पर्वतानामैरावणः सारबलो गजानाम् ।
सिंहो बलिष्ठो यथा श्वापदानां तथैव शीलं प्रवरं व्रतानाम् ॥१५४॥

Just as *Meru* is the highest of mountains, *Airāvata* the most powerful of elephants, the lion the strongest of wild animals, so too is chastity, the greatest of religious vows.

धन्ना ते च्चिय पुरिसा जयम्मि जीयं च ताण सुकयत्थं ।
जे मुत्ति-रमणि-रत्ता विरत्त-चित्ता पर-त्थीसु ॥ १५५ ॥

धन्यास्त एव पुरुषा जगति जीवितं च तेषां सुकृतार्थम् ।
ये मुक्तिरमणीरक्ता विरक्तचित्ताः परस्त्रीषु ॥ १५५ ॥

Blessed indeed are those persons and their meritorious lives who are in love with the bride of liberation (i.e. salvation), and whose minds are turned away from others' wives.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जो देइ कणय-कोडिं अहवा कारेइ कणय-जिण-भवणं ।
तस्स न तत्तिय-पुण्णं जत्तिय बंभ-व्वए धरिए ॥ १५६ ॥

यो ददाति कनककोटिमथवा कारयति कनकजिनभवनम् ।
तस्य न तावत्पुण्यं यावद् ब्रह्मव्रते धृते ॥ १५६ ॥

The religious merit that one acquires by giving away ten millions of gold or by erecting a golden temple dedicated to a *Jina*, can not vie with that gained by a vow of continence.

मइलइ विमलंपि कुलं हीलिज्जइ पागएणवि जणेण ।
पडइ दुरंते नरए पुरिसो पर-नारि-संगेण ॥ १५७ ॥

मलिनयति विमलमपि कुलं हील्यते प्राकृतेनापि जनेन ।
पतति दुरन्ते नरके पुरुषः परनारीसङ्गेन ॥ १५७ ॥

By intercourse with another's wife, a man casts a dark stain even upon his pure lineage, is looked down upon even by an insignificant person and falls into an endless hell.

उच्छिट्ठं विट्ठं पिव पर-नारिं परिहरंति स-प्पुरिसा ।
सेवंति सारमेयव्व निंदिया जे दुरायारा ॥ १५८ ॥

उच्छिष्टं विष्ठामिव परनारीं परिहरन्ति सत्पुरुषाः ।
सेवन्ते सारमेया इव निन्दिता ये दुराचाराः ॥ १५८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Good men avoid another's wife like a crumb spit out of the month and dung while the despicable and licentious persons have intercourse like a dog.

बहुसो चिंतिज्जंतं आवइ-पडिआण कुल-प्पसूआणं ।
मरणं विणा ण सरणं रमणीणं रमण-विरहेणं ॥ १५६ ॥

बहुशश्चिन्त्यमानमापत्पतितानां कुलप्रसूतानाम् ।
मरणं विना न शरणं रमणीनां रमणविरहेण ॥ १५६ ॥

To ladies of high descent, when their honour is in danger in the absence of their husbands, there is no other refuge than death, however much they may think ( over the matter to find out means of escape from the peril ).



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मध्यस्थः ।

## Umpire.

रत्ता पिच्छंति गुणे, दोसे पिच्छंति जे विरुंधंति ।
मज्झत्थच्चिय पुरिसा दोसे अ गुणे अ पिच्छंति ॥ १६० ॥

रक्ताः पश्यन्ति गुणान्, दोषान् पश्यन्ति ये विरुन्धन्ति ।
मध्यस्था एव पुरुषा दोषांश्च गुणांश्च पश्यन्ति ॥ १६० ॥

Devoted ones see only the good qualities and those who have antipathy see only the faults ; it is only the impartial who see both good and bad qualities i. e. the bright and dark sides of a thing.

विमलम्मि दप्पणे जह पडिबिंबइ पास-वत्ति-वत्थु-गणो ।
मज्झत्थम्मि तहा नणु संकमइ समग्ग-धम्म-गुणो ॥ १६१ ॥

विमले दर्पणे यथा प्रतिबिम्बति पार्श्ववर्तिवस्तुगणः ।
मध्यस्थे तथा ननु संक्रामति समग्रधर्मगुणः ॥ १६१ ॥

As in a clear mirror all the things lying on either side, are reflected, so all the qualities are reflected in the mediator i. e. only one who is neutral, can judge impartially all the good and bad qualities.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## गुरुः ।

## Preceptor.

बहिरंतरंग-भेआ ववहाराही न दिंति तस्स दुहं ।
गुरु-वयणाओ जेणं सुह-झाण-रसायणं पत्तं ॥ १६२ ॥

बहिरन्तरङ्गभेदा व्यवहाराधयो न ददति तस्य दुःखम् ।
गुरु-वचनाद् येन शुभध्यानरसायनं प्राप्तम् ॥ १६२ ॥

The external conduct and the internal mental anxiety do not affiict pain to him who has obtained the great medicine of right meditation from the counsel of his spiritual preceptor.

* टोलुव्व टलटलंतो अहयं, विन्नाण-नाण-निलएण ।
देवुव्व वंदणिज्जो कओ म्हि गुरु-सुत्तहारेण ॥ १६३ ॥

शलभ इव भ्राम्यन्नहं, विज्ञानज्ञाननिलयेन ।
देव इव वन्दनीयः कृतोऽस्मि गुरुसूत्रधारेण ॥ १६३ ॥

Rolling about ( metaphorically wandering aimlessly about ) like a piece of stone, I have been made worthy of salutation like a god by my spiritual preceptor, who can thus be compared to a stone-mason ( lit: carpenter ) and who is the abode of science and knowledge.

---

* See H. D. V. 4

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Just as a stone-mason, an adept in his art, chisels a rough piece of stone, rolling about here and there, into the image of a god, which is thenceforth reverently worshipped, so too I devoid of knowledge who previously wandered about aimlessly, have been transformed into a person worthy of reverence, by my spiritual preceptor, the receptacle of true knowledge.

सुर-नर-सुहाइं सयलाइं तेणं दिण्णाइं निव्वुइ-सुहं च ।
परमत्थ-बंधवेणं दिण्णो जेणेस जिण-धम्मो ॥ १६४ ॥

सुरनरसुखानि सकलानि तेन दत्तानि निर्वृतिसुखं च ।
परमार्थबान्धवेन दत्तो येनैष जिनधर्मः ॥ १६४ ॥

The person, versed in spiritual knowledge who has taught the religion of ( i. e. preached by ) the *Jinas*, has at same time given all the happiness of the gods and men as well as that of salvation.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मुनिः ।

## Sage.

वंदिज्जमाणा न समुक्कसंति हीलिज्जमाणा न समुज्जलंति ।
दंतेण चित्तेण चरंति धीरा मुणी समुग्घाइअ-राग-दोसा ॥१६५॥

वन्द्यमाना न समुत्कर्षन्ति हेल्यमाना न समुज्ज्वलन्ति ।
दान्तेन चित्तेन चरन्ति धीरा मुनयः समुद्घातितरागद्वेषाः ॥१६५॥

Ascetics, who have their worldly affection and malice uprooted, are not elated when saluted nor enraged when insulted but conduct themselves with serenity by reason of a subdued mind.

बालाभिरामेसु दुहावहेसु न तं सुहं काम-गणेसु राया ! ।
विरत्त-कामाण तवो-धणाणं जं भिक्खुणो सील-गुणे रयाणं ॥१६६॥

बालाभिरामेषु दुःखावहेषु न तं सुखं कामगणेषु राजन् ! ।
विरक्तकामानां तपोधनानां यद्भिक्षूणां शीलगुणे रतानाम्॥ १६६॥

Oh king ! the happiness, that is met with among anchorites ( lit : beggars ) who have taken an aversion to sensual pleasures, whose sole wealth is austerity and who are engaged in the practice of the virtue of continence, is something immeasurably superior to the pleasure that is derived from the gratification of the passions appearing pleasing to youths but bringing sufferings in the end.

